## किमः क्षेपे। (७०/९८८)

[1]क्षेपे यः किंशब्दः ततः परस्य समासान्तो न भवति। [2]किंराजा यो न रक्षति। किंसखा यो[3]ऽभिद्रुह्यति। किंगौर्यो न वहति। "[4]किं क्षेपे" (२.१.६४/७४३) इति समासः। क्षेपे इति किम्? कस्य राजा किंराजः। किंसखः। किंगवः॥

## नञस्तत्पुरुषात्। (७१/९८६)

नञः परे वक्ष्यमाणा ये [5]राजादय[6]स्तदन्तात् तत्पुरुषात् समासान्तो न भवति। [7]अराजा। असखा। अगौः। तत्पुरुषात् इति किम्? अनृचो माणवकः। [8]अधुरं शकटम्॥

## पथो विभाषा। (७२/९८७)

[9]नञः परो यः पथिन्शब्दः, तदन्तात् तत्पुरुषात् समासान्तो विभाषा न भवति। पूर्वेण नित्यः प्रतिषेधः प्राप्तो [10]विकल्प्यते। अपथम्, अपन्थाः॥

## बहुव्रीहौ सङ्ख्येये डजबहुगणात्। (७३/८५१)

सङ्ख्येये यो बहुव्रीहिर्वर्तते तस्माद् अबहुगणान्तात् डच् प्रत्ययो[11] भवति। सङ्ख्ययाव्ययासन्न (२.२.२५/८४२) इति [12]यो बहुव्रीहिः तस्येदं ग्रहणम्। उपदशाः। उपविंशाः। उपत्रिंशाः। आसन्नदशाः[13]। अदूरदशाः[14]। अधिकदशाः। द्वित्राः। पञ्चषाः। [15]पञ्चदशाः। सङ्ख्येये इति किम्? चित्रगुः। शबलगुः। [16]अबहुगणात् इति किम्? उपबहवः। उपगणाः। अत्र स्वरे विशेषः।

[६३८] डच्प्रकरणे सङ्ख्यायास्तत्पुरुषस्योपसङ्ख्यानं [17]कर्तव्यं निस्त्रिंशाद्यर्थम्। (म.भा.२.४३९)

निर्गतानि त्रिंशतः निस्त्रिंशानि वर्षाणि देवदत्तस्य। [18]निश्चत्वारिंशानि यज्ञदत्तस्य। [19]निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः॥

## ऋक्पूरब्धूःपथामानक्षे। (७४/९४०)

बहुव्रीहौ इति [20]न स्वर्यते। सामान्येन विधानम्। ऋक् पुर् अप् धुर् पथिन् इत्येवमन्तानां [21]समासानाम् अकारः प्रत्ययो भवति समासान्तो[22]ऽक्षे न। सामर्थ्याद् धुर एतद् विशेषणम्, ऋगादीनां न भवति। अक्षसम्बन्धिनी या धूः तदन्तस्य न[23] भवति। अनृचः। बह्वृचः। अर्धर्चः। पुर् – ललाटपुरम्। नान्दीपुरम्। अप् – द्वीपम्। [24]अन्तरीपम्। समीपम्। धुर् – राजधुरा। [25]महाधुरः। पथिन् – स्थलपथः। जलपथः (म.भा. २.४४०)। अनृचो अनक्षे इति किम्? [26]अक्षस्य धूः अक्षधूः। दृढधूः अक्षः। अनृचो माणवको ज्ञेयो, बह्वृचश्चरणाख्यायाम्। माणवकः। बह्वृचो ब्राह्मणः। अनृक्कं साम, बह्वृक्कं सूक्तम् इत्यत्र न भवति॥

---

1. क्षेपार्थः क. 2. कुत्सितो राजा इत्यधिकम् क. ड. 3. न द्वेष्टि ह. 4. किं क्षेपे–किंगवः नास्ति ड. फ. 5. ऋगादयः क. ड. फ. ह. 6. तदन्तात् नास्ति क. 7. अनृक् ह. 8. अधुरः शकटः फ. ह. 9. नञस्तत्पुरुषात् इति वर्तते इत्यधिकम् क. 10. अनेन इत्यधिकम् क. 11. समासान्तः इत्यधिकम् ड. फ. 12. यो नास्ति फ. 13. आसन्नविंशाः इत्यधिकम् क. 14. अदूरविंशा इत्यधिकम् क. ड. 15. पञ्चदशाः नास्ति ब. क. ड. फ. 16. अबहुगणान्तात् क. 17. कर्तव्यम् नास्ति फ. 18. उदाहरणमिदं नास्ति फ. 19. उदाहरणमिदं नास्ति क. 20. नानुवर्तते क. 21. समासानाम् नास्ति फ. 22. अनक्षे इति क. 23. प्रत्ययः इत्यधिकम् फ. ड. 24. अन्तरीपम् नास्ति फ. 25. महाधुरा ड. फ. 26. अक्षस्य धूः नास्ति फ.